National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(65): 301-304
© 2026 NJHSR
www.sanskritarticle.com

**खेमराजः**
शोधच्छात्रः,
हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालय,
धर्मशाला, हिमाचल प्रदेश

**Correspondence:**
**खेमराजः**
शोधच्छात्रः,
हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालय,
धर्मशाला, हिमाचल प्रदेश

# देवभूमिहिमाचलप्रदेशे वर्त्तमानपरिप्रेक्ष्ये यौगिकसाद्धकानां प्रासाङ्गिकता

**खेमराजः**

**सारांशः**

भारतीयसंस्कृतौ संस्कृतसाहित्ये च ज्ञानविज्ञानयोः असीमितकोशो विद्यते। विभिन्नाचार्याः, लेखकाश्च स्वस्वयोगदानं दत्त्वा विविधातुलनीयग्रन्थानां रचनाञ्चक्रुः। एतेषु कैश्चन् विद्वद्भिः सात्विकसाधनाद्वारा स्वमार्गः प्रशस्तीकृतवन्तः, कैश्चन् तान्त्रिकसाधनायाः बले स्वमनोरथानां पूर्तिः कृतवन्तः। एतेषु चरकस्वामी, पतञ्जलिः, सुश्रुतस्वामी, शबरस्वामी इत्यादयो विद्यन्ते। यैः सम्पूर्णलोकसमाजाय स्वजीवनस्याहूर्तिं दत्त्वा लोककल्याणकार्यं प्रतिपादितवन्तः।

प्राचीनसंस्कृतसाहित्यवाङ्मयस्य परिशीलनेन सञ्ज्ञायते यच्चरकस्वामी आयुर्वेदस्य विश्रुतविद्वान्नासीत्। प्राचीनवैदिककाले रचनानां, ग्रन्थानां कृतीनाञ्च निर्माणं वैदिकशाखायाः अनुसारमेव भवन्ति, यथा कठशाखाऽन्तर्गतस्य 'कठोपनिषदः' रचनाऽभवत् । क्रमेऽस्मिन् केषाञ्चन् विदुषाम्मतमस्ति यदेतेषां शाखाऽन्तर्गतत्वेन चरणगतत्वेन च विषयाध्ययनत्वादेव 'चरकसंहिते'ति नाम लोकप्रसिद्धो बभूव। 'चरकसंहिते'ति आयुर्वेदस्यैकः सुप्रसिद्धग्रन्थो प्रवर्तते। संस्कृतभाषीयग्रन्थस्यास्योपदेशकः 'अत्रिपुत्रपुनर्वसुः', ग्रन्थकर्ता 'अग्निवेशः' प्रतिसंस्कारकश्च 'चरकः' इत्याख्यास्ति। ग्रन्थोऽयमायुर्वेद-स्याधारभूतो बहुप्राचीनग्रन्थोऽस्ति ।

एतेषु चरकस्वामिनः '**चरकसंहिता**', सुश्रुताचार्यस्य '**सुश्रुतसंहिता**' तथा च वाग्भट्टाचार्यस्य '**अष्टाङ्गसङ्ग्रहः**' चेति अद्यत्वेऽपि भारतीयचिकित्साविज्ञाने मानकग्रन्थाः अङ्गीक्रियन्ते। 'चरकसंहिते'ति ग्रन्थस्यास्य रचनाकालो द्वितीयशताब्दीपूर्वमासीत्। ग्रन्थोऽयमष्टभागेषु विभज्यते। ग्रन्थेऽस्मिन् चरकस्वामिना विविधचिकित्सकीयसूत्रैः रोगाणां निदानस्य प्रकाराः वर्णिताः। अद्यत्वेऽपि एतेषां विषये चिकित्साक्षेत्रे नानागहनकार्याणि क्रियन्ते। तथा चरकसंहितया बहुशल्यचिकित्सायाः कार्याणि सार्थकानि भवन्ति ।

ततः परमाचार्यसुश्रुतेन 'सुश्रुतसंहिता' इत्याख्यग्रन्थो विरचितः। यत्र प्रायशः शतमध्यायाः विद्यन्ते, येषु शल्यचिकित्सायाः, तस्याः साधनानि, शल्यचिकित्सकस्य सहायकानां, विविधशल्यचिकित्सा-विषयकवर्णनं वर्णितमस्ति । आचार्यसुश्रुतो न केवलं भारतवर्षेऽपि तु समस्तसंसारे लोकप्रसिद्धोऽस्ति। एतस्मात्कारणादेव ऑस्ट्रेलियादेशे तु आचार्यसुश्रुतस्य प्रतिमाऽपि विश्वविख्यातौषधालये संस्थापिता प्रवर्तते। यत्र सर्वे चिकित्सकाः, चिकित्सामर्मज्ञाः अध्येतृछात्राश्चाद्यतनीयसमयेऽपि प्रत्यहमभिवादनं कुर्वन्ति। दिव्यगुणैः परिपूरितावुभावाचार्यः अद्यत्वेऽपि लोकप्रसिद्धो वर्तते । परञ्चायं महदाश्चर्यस्य विषयोऽस्ति यत्संस्कृतसाहित्यं तथा संस्कृतजगतं विहाय कोऽपि आचार्यसुश्रतविषये नैव जानाति ।

**कूटशब्दाः**
सिद्धिः, साधकाः, पुराणम्, समाजहितम्, महर्षिः, धर्मम्, रचयिता इत्यादयः।

**उद्देश्यानि**

१. जिज्ञासुकाः पाठकाश्च सिद्धीनां शक्तिविषये ज्ञास्यन्ति ।

२. अनेन प्राचीनार्वाचीनसाधकानां विषये ज्ञास्यन्ति ।

३. प्राचीनार्वाचीनसाधकानां जीवनविषये ज्ञास्यन्ति ।

४. साधकानां योगदानस्य विषये ज्ञास्यन्ति ।

५. श्रीमद्भागवताग्निमहापुराणयोः वर्णितहिमाचलीयसाधकानां विषये ज्ञास्यन्ति ।

**प्रस्तावना**

श्रीमद्भागवताग्निमहापुराणयोः भगवत्प्राप्तये मोक्षप्राप्तये च सिद्धीनां विषये यत्र-तत्र प्रसङ्गाः समुपलभ्यन्ते। कुत्रचित्तु विविधसाधनानां मन्त्राणामपि व्याख्याः विहिताः सन्ति। विशेषतया अग्निमहापुराणे सविस्तरेण विभिन्नसिद्धीनां वर्णनं प्रतिपादितमस्ति। अत एवानेन सिद्ध्यति यत् महर्षिवेदव्यासेन प्रतिपादिते अग्निमहापुराणे निगदितैः मन्त्रैः साधकेभ्यः साधनायै स्पष्टरूपेण सहायता प्रतिपादिता वर्तते। येन वेदव्यासस्य महत्त्वं तेन अनुभूतमन्त्रप्रयोगैः सिद्ध्यति। प्राचीनमहापुरुषाणां तथा तेषां सिद्धीनां विषये वर्णनं महापुराणेष्वित्थं प्राप्यते

**प्राचीनमहापुरुषाणां सिद्धीनाञ्च वर्णनम्**

प्राचीनभारतीयपरम्परायां तथा लोकसमाजेऽपि बह्वाचार्याः, लेखकाः, कवयः, महाकवयश्च सन्ति, यैः संस्कृतसंसारं नूतनादृष्टिः प्रदत्ता। तथा अद्यत्वे वयं तेषामेवानेकशो ग्रन्थानामध्ययनं कृत्वा समाजहिताय विविधशास्त्रीयकार्याणि कुर्मः। विविधशोधग्रन्थानां नानासाहित्यिकरचनानाञ्च प्रणयनं कृतम्। क्रमेऽस्मिन् सर्वप्रथमतया महर्षिवशिष्ठस्य नामायाति। ततः महर्षिशक्तिः, महर्षिपराशरः, महर्षिवेदव्यासः इत्यादिमहापुरुषाणां स्थानं विद्यते। तैः विविधसिद्धीनां प्रसङ्गो यत्र-तत्र पुराणादिष्वपि सम्प्राप्यते। एतेषां महापुरुषाणामत्र सप्रसङ्गप्रयत्नानि प्रतिपाद्यन्ते। तेषां संक्षिप्तपरिचयः इत्थं सम्प्राप्नोति ।

**महर्षिवसिष्ठः**

सर्वेषु पुराणेषु तथा सप्तर्षिरूपेण महर्षिवशिष्ठो परिगण्यते। यस्य कृतयुगे जन्म बभूव। हिमाचलप्रदेशः वशिष्ठस्य निवासरूपेण विविधमहापुराणानामनुसारं परिगण्यते। आदिमहाकाव्ये रामायणे भगवद्वाल्मीकिनाऽपि भगवच्छ्रीरामचन्द्रस्य कुलगुरुरूपेणापि महर्षिवशिष्ठ वर्ण्यते। हिमाचलप्रदेशस्य स्थानीयजनाः वशिष्ठस्य जन्मस्थानं हिमाचलप्रदेशस्थकुल्लूतजनपद इति स्वीकृत्य अद्य कुल्लूतजनपदस्य **'बीशटः'** इत्याख्ये ग्रामे दिव्यशक्तिसम्पन्नस्य महर्षिवशिष्ठस्यैको भव्यदेवालयः स्थितोऽस्ति। रामायणस्य उत्तरकाण्डेऽपि वर्ण्यते यद्भगवत्याः सीतायाः भूमिलयविषये पूर्वमेव सर्वं जानाति स्म। परञ्च विधातुः विधौ हस्तक्षेपात्स सर्वथा दूर एवातिष्ठत् । महर्षिवशिष्ठस्य भार्याः नाम 'अरुन्धती' इत्याख्या साध्वी स्त्रीः आसीत्। सा परमपतिव्रता, परमसाध्वी, धर्मपरायणा, धर्मज्ञा, पतिसेवारता चासीत् । अद्यत्वेऽपि आकाशमण्डले सप्तर्षिनक्षत्रमण्डले तस्याः स्थानमपि दरीदृश्यते मन्यते च।

**महर्षिपराशरः**

महर्षिवशिष्ठस्य पुत्रस्य नाम **'शक्तिः'** इति तथा तस्य पुत्रस्य नाम एव **'पराशरः'** इति समुपलभ्यते। महर्षेरस्य प्रसङ्गो महाभारतस्य आदिपर्वणि समुपलभ्यते । यत्र महाराजशन्तनोः निषादकन्यकया सह विवाहप्रसङ्गो वर्णितमस्ति। सत्यवती महाभारतस्य महत्त्वपूर्ण-पात्ररूपे परिगण्यते। यद्यपि अस्याः जन्म ब्रह्मणः शापवशादेव 'सुधन्वा' इत्याख्यनृपद्वारा व्याधखगाय प्रदत्तवीर्यद्वारा **'अद्रिका'** इत्याख्यायाः मत्स्यरूपायाः अप्सरायाः गर्भाद् बभूव, परञ्च वीर्यस्यास्य भक्षणं कृत्वा मत्स्या कालान्तरमेकस्मै निषादाय प्राप्ता। तेन मत्स्याः उदरात् कन्यकेयं निष्कासय पालनपोषणादिकं कृत्वा अस्याः नामकरणं 'सत्यवती' इति कृतम्, अत एव मत्स्यसन्ततित्वेनास्याः अपरनाम **'मत्स्यगन्धा'** इत्यपि आसीत्। महर्षिपराशरः स्वपितामहसदृशः अद्वितीयज्ञानी आसीत् । सत्यवत्याः मुखं दृष्ट्वैव तस्याः सम्पूर्णजीवनस्य विषये स अजानत् । अत एव तस्या भविष्यस्य दुर्भाग्यविषये ज्ञानं प्राप्य महर्षिपराशरेण तामेकं पुत्ररत्नं प्रदत्तम् । एतेषां समेषां जन्मभूमिः **'हिमाचलप्रदेशः'** एवासीत्। महर्षिपराशरस्य विविधदेवालयाः अपि हिमाचलप्रदेशस्य कुल्लूतजनपदस्य **'कुमान्दः', 'कुलङ्गः', 'डोघरः', 'लीलः' 'खोड़ाआगे'** चेति स्थानेषु विद्यन्ते।

**महर्षिवेदव्यासः**

महाभारतमहाकाव्यस्य रचयितुः सम्बन्धो हिमाचलप्रदेशस्य बिलासपुरजनपदान्मन्यते। अद्यतनीये बिलासपुरजनपदे बहुकालपूर्वं महर्षिवेदव्यासस्य नामाधारेणैव 'व्यासपुरः' इति नाम्ना सञ्ज्ञायते स्म। तत्र एका व्यासगुहा आसीत् यत्र महर्षिवेदव्यासेन स्वजीवनस्य एकस्मिन् कालखण्डे तपस्या कृता। महर्षिवेदव्यासस्य गुहायाः अन्तःपुर एव महर्षिमार्कण्डेयस्य निवासं यावत् मार्ग आसीत्। मार्कण्डेयर्षेः तपस्स्थली अद्यत्वेऽपि विद्यमानास्ति। अद्य व्यासगुहा 'गोविन्दसागरः' इत्याख्ये सरसि विलीना वर्तते। एतदतिरिक्तं रोहताङ्गदर्रा इत्याख्ये स्थानेऽपि एको व्यासकुण्डो विद्यमानोऽस्ति।

**महर्षिशुकदेवमुनिः**

शुकदेवमुनिः महर्षिवेदव्यासपुत्रः आसीदिति। मण्डीजनपदस्थं 'सुकेतः' इति क्षेत्रं शुकदेवमुनिना सम्बन्धितमस्ति। लोकेतिहासानुसारं तथा लोकपरम्परायाः अनुसारं मन्यते यच्छुकदेवमुनिना क्षेत्रेऽस्मिन् तपस्यां कृत्वा गहनचिन्तनं, मननमध्ययनञ्च कृतम्। सुकेतक्षेत्रं इतः पूर्वं शुकक्षेत्रमासीत्तथा शब्दोऽयं लोकवाण्यां 'सुकेतः' इति रूपेणाङ्गीक्रियते। जनानां मान्यता वर्तते यत् इतः शुकदेवमुनिः जनकपुरीमगच्छत्। कुल्लूतजनपदेऽपि शुकदेवमुनेः देवालयो विद्यते । देवालयोऽयं 'सन्याणी' इत्याख्ये स्थाने स्थितोऽस्ति ।

**जमदग्निः**

कुल्लूतजनपदस्य 'मलाणा' इत्याख्ये ग्रामे जामलूदेवतायाः प्राचीनदेवालयो विद्यते। यत्र अद्यत्वेऽपि कोऽपि अद्यतनीय-न्यायप्रणाली वर्जिता वर्तते, तत्र जामलूदेवताद्वारैव न्यायव्यवस्था क्रियते। वस्तुतो महाभारते वर्णितः महर्षिजगदग्निः एकः ऋषिः आसीत्। पूजासिद्धान्ते निबद्धप्रमाणैः तथ्यस्यास्य पुष्टिः कृता वर्तते। वस्तुतस्तु 'जामलूः' 'जमदग्निः' वेति सुप्रसिद्धः देवः कुल्लूतजनपदस्य सर्वाधिकाराध्यदेवः स्वीक्रियते। जनपदेऽस्मिन् प्रायशः अष्टादशकोटि-देवानां स्थापना जमदग्निद्वारैव कृता वर्तते। लोकसाहित्ये लोकगाथासु

चोल्लेखः सम्प्राप्यते यद् यदा जामलूदेवता अष्टादशकोटिदेवताभिः सह सुमेरूपर्वतः मानसरोवरात् हिमाचलप्रदेशस्य लाहौलस्पिति-जनपदस्य **'हंसा'** इत्याख्यात् ग्रामात् गच्छन् **'हामटा'** इति नामकस्थाने आगच्छत्तथा सिरमौरजनपदस्य रेणुकानामकस्थानेऽपि ऋषिजमदग्नेः तथा तस्य धर्मपत्न्याः रेणुकायाः दिव्यधामः स्थितोऽस्ति। महाभारतस्य कथाऽनुसारं तेन स्वपुत्राणां परीक्षार्थं स्वधर्मपत्न्याः शीशक्रन्तनस्याज्ञा प्रदत्ता, परञ्च ज्येष्ठपुत्रेषु केनापि स्वमातुः शीशक्रन्तनं नैव कृतम् । किन्तु कनिष्ठपुत्रपरशुरामेण पितुः आज्ञायाः परिपालनं कृत्वा मातुः शीशक्रन्तनं कृतम्। अस्य कर्त्तव्यपरिपालनेन महर्षिजमदिग्नः परमसन्तुष्टो बभूव। तदा तेन जमदग्निना पुनः स्वतपोबलेनैव स्वधर्मपत्न्यै जीवनं प्रदाय जीवितं कृतम् । एतादृशैः दिव्ययोगैः शक्तिभिश्च सम्पन्नो महर्षिजमदग्निः अद्यत्वेऽपि हिमाचलप्रदेशस्य गौरवरूपेण 'जामलूदेवः' इति रूपेणाङ्गीक्रियते ।

एतदतिरिक्तं परशुरामः, महर्षिगौतमः, दुर्वासा, महर्षिकपिलः, महर्षिविभाण्डकः, ऋष्यशृङ्गर्षिः, महर्षिभृगुः, महर्षिच्यवनः, महर्षिमार्कण्डेयः, महर्षिगर्गः, महर्षिलोमशः, महर्षिशाण्डिल्यः, महर्षियाज्ञवल्क्यः, महर्षिशौनक आचार्यसनकश्चेत्यादयः अद्यतनीय-युगेऽपि स्थानीयजनाः सनकनामकमानसपुत्रस्य चरितं तथा ब्रह्मणस्तथा च तस्य चतुर्णां मानसपुत्राणां कथानकाः आख्यानानि च जीवन्तरूपेण समुपलभ्यन्त इति ।

एतादृशानि अनेकशः प्रमाणानि सन्ति, यैः सिद्ध्यति यत् हिमाचलप्रदेशः न केवलं प्रदेशः अपितु भूमिरियं महापुरुषाणां पुण्यतपोभूमिरपि आसीत्। तथा न केवलमत्र एतादृशानां महापुरुषाणां प्रादुर्भावाः बभूवतुः, अपितु तैः अत्यन्तकठिनतपश्चर्यादीनामपि प्रसङ्गाः अत्रोपलभ्यन्ते। येषां प्रमाणानि अद्यत्वेऽपि दरीदृश्यन्ते ।

**1. अर्वाचीनमहापुरुषाणां सिद्धेः वर्णनम् (सर्वेक्षणविधिना)**

न केवलं प्राचीनेतिहासे अपितु अद्यत्वेऽपि अनेकशो विभूतयः विद्यन्ते, यैः स्वसेवाभावनया लोककल्याणाय विविधोपचारैः, मन्त्रतन्त्र-यन्त्रादिमाध्यमैः, स्वगहनपरिश्रमेण, स्वदिव्यतेजसा च लोकानां जनानां वा कल्याणाय अहर्निशं कार्यं कुर्वन्ति । एतेषु केषाञ्चन् जनानां सजीवनपरिचयसहितं वर्णनमत्र स्थापयामि, यथा

**पण्डितसीतारामशर्मा**

कर्मकाण्डमर्मज्ञस्य दशनाहाविद्यातल्लजस्य सुप्रसिद्धमुर्धन्यविदुषः परमसन्तस्य महात्मन्पण्डितसीतारामशर्मणः पितुर्नाम श्रीगणेशु-रामशर्मा आसीत्। पण्डितसीतारामशर्मा अत्यन्तसरल-विनम्रप्रकृति-सम्पन्नः समाजव्यवहारनिष्णान्तश्चास्ति। अस्य जन्म देवभूमि-हिमाचलप्रदेशस्थशिमलाजनपदस्यान्तर्गतं 'सुन्नी'ति उपमण्ड-लस्य पाहलग्रामे (शिलड्डूग्रामे वा) अभवत्। ग्राममिदं हिमाचल-प्रदेशस्य राजधानीशिमलातः प्रायशः द्वात्रिंशत्परिमितकिलोमीटरदूरे स्थित-मस्तीति। पूज्यगुरुवर्यैः उक्तमस्ति यत्तेन बहुप्राचीनविद्याः विद्वत्पूर्वजानामाशीषैरेवावगम्यते । तद्यथा

**"ॐ काली-काली महाकाली विसर्पिकादोषनिवारिणी"** इति विसर्पिकाऽसाध्यरोगोन्मूलनमहामन्त्रस्य सिद्ध्यनन्तरमेकादशवार-मुच्चारणेन विसर्पिकारोगान्मुक्तिर्भविष्यतीति ध्रुवम्। अनेन साकमेकामौषधिमपि स्वीकर्त्तव्यम्, अस्याः विषये स्वशोधप्रबन्धे मया उल्लेखितमस्ति यस्याः प्रभावेण मासत्रये रुग्णो रोगमुक्तो भविष्यतीति ।

तथैव प्राचीनगुह्यविद्येयं मया स्वगुरुवर्यैः शौलनिवासिभिः श्रीमस्तराममहोदयैः अर्जितमस्ति यस्य व्यवसायः चिकित्सेत्यप्यस्ति । यां भूतप्रेतपिशाचमहामारीरोगविघ्नताग्रहबाधाऽदीनां मुक्तिमन्त्राः प्रयोगविधिना सहैव स्वशोधप्रबन्धे निगदिताः सन्ति। एतेषां मन्त्राणां प्रयोगेण अनेनासाध्यरोगैः ग्रसितपीडितमानवानां रोगाणां विनाशो भवति। तेनोक्तं यत् मया स्वपूज्यगुरवरस्वर्गीयकाशीराममहोदयानां सान्निध्ये मन्त्रोऽयं सम्प्राप्तम् । मम गुरुवर्य्यः पूज्यकाशीराममहोदयाः कर्मकाण्डस्य क्षेत्रे अग्रगण्यमहापुरुषाः सन्ति। ते विविधविद्यानां ज्ञातार आसन् । सौभाग्यवशादेव तेषामनुग्रहेण गुह्यविद्यायाः अस्याः स्ववसरमप्राप्नोत् तथा च मयाऽनया विद्यया प्रायशः पञ्चशताधिकैकसहस्रसङ्ख्यकजनानां निदानमुपचारश्च कृतोऽस्ति। तत्र सर्वमन्त्रकीलनस्तोत्रमन्त्रो यथा **"ॐ उग्रं वीरं महाविष्णुमि"**ति इयमपि विद्या स्वसद्गुरुवर्यैः स्वर्गीयकाशीराममहोदयैः सम्प्राप्यते । विद्ययाऽनया साधकाः विविधमारणसम्मोहनोच्चाटनादिकार्याणां सम्पादनं कुर्वन्ति। अनेन मृत्युपरि विजयोऽपि प्राप्तुं शक्यते । यदि केनचित् भूतपिशाचादिकेन कारणवशाद् दुष्टात्मना कस्यचित् व्यक्तेः कीलनं कृतमस्ति। तदा मन्त्रस्यास्य १०८ वारं जप्त्वा कटुहोमं कृत्वा तस्योत्कीलनं क्रियते। मन्त्रस्यास्य सुफलप्रयोगो गुरोः आशीषैरेव सफलीभूतो भविष्यतीति।

**श्रीबलवीरमहोदयः**

श्रीबलवीरमहोदयस्य जन्म अस्माकं हिमाचलप्रदेशस्य जनपद-शिमलानगरतः प्रायशः पञ्चचत्वारिंशत्किलोमीटरदूरे ठियोगोप-मण्डलस्य किलाराग्रामे बभूव। अनेनाल्पकाल एव मशाणसिद्धि-विद्यायां सिद्धहस्ततां सम्प्राप्तेति। विद्येयं 'स्वर्गीयश्रीजानियारामः' इति स्वगुरोः स्वपितामहाद्वा वंशानुक्रमत्वादेव तस्य पित्रा स्वर्गीयश्रीगलुराममहोदयेन सम्प्राप्ता तथा तस्मात् अस्माकं पूज्यवरेण श्रीबलवीरमहोदयेनात्यन्तकठोरसाधनाद्वारा सिद्धिरियं संलब्धा। 'मशाणसिद्धिः' इति विद्येयं ग्रहदोषपितृदोषवंशवृद्धिबाधक-भूतप्रेतपिशाचतन्त्रमन्त्रादिभिः ग्रसितानां पीड़ितजनानां विविध-बाधानां निवारणं गृहभूमेः परीक्षणानन्तरं क्रियते। भगवतः असीमानुग्रहेण वंशदोषसहितपितृदोषस्य निवारणं क्रियते । कार्यमिदं प्रायो भृगुवासरे शीघ्रतया सफलीभवतीति ।

**सिद्धमहापुरुषः श्रीमाठाराममहोदयः**

सिद्धमहापुरुषस्यास्य जन्म देवभूमिहिमाचलप्रदेशस्य शिमलाजन-पदात्प्रायशः पञ्चचत्वारिंशद्दूरे ठियोगोपमण्डलस्य किलराग्रामे बभूव। एतैः सप्तवर्ष एव मशाणसिद्धौ सिद्धहस्तता प्राप्नुवन्ति । एतेषां पित्रा प्राचीनविद्येयं स्वपूज्यगुरुदेवात्पितामहाच्च स्वर्गीयश्रीजा-

नियारामात् प्राप्ता तथा वंशानुक्रमत्वात् स्वपितुः स्वर्गीयश्रीगलू-रामाच्छुभाशीषैः साकं कठिनतपश्चर्याद्वारा सम्प्राप्ता। विद्ययाऽनया वंशबाधकतादोषः पितृदोषः, गृहवृद्धिबाधकदोषः, भूतप्रेतबाधा-दोषश्चेत्यादीनां निवारणं गृहस्य मृतिकां तथा जातकस्य मातृभूमेः परीक्षणद्वारा क्रियते।

भगवतोऽनुपमानुग्रहेण वंशबाधकतादोषपितृदोषयोः उपायाः तथा पितरेभ्यः पृच्छन् कार्येऽस्मिन् सिद्धता प्राप्यते तथा एतस्मै सिद्धानां मनसि कुलेष्टदेवताकुलदेवीग्रामदेवतापूर्वजवंशावलयश्चेत्यादीनां सम्पूर्णज्ञानमावश्यकं विद्यत इति।

**वैद्यः श्रीमोतीरामठाकुरमहोदयः**

अद्य श्रीमोतीरामठाकुरमहोदयेन सह वार्तालापस्य स्ववसरं प्राप्तम्। महोदयस्यास्य जन्म देवभूमिहिमाचलप्रदेशस्य सोलनजनपदस्य कण्डाघाटोपमण्डलस्य 'छावसा' इत्याख्ये ग्रामे १९३६ तमे वर्षे बभूव। स्थानमिदं शिमलानगरात्पञ्चाशत्किलोमीटरदूरे स्थितमस्ति। वार्तालापस्यान्तर्गतं तेषां वचनानीत्थं आसन् यत् तेषां प्रथमगुरुभ्यः श्रीमोहनलालशास्त्रीमहोदयेभ्यः अध्यात्मशिक्षाऽप्राप्नोत्। ते कर्मकाण्डस्य प्रकाण्डविद्वान् तथा प्राचीनविद्यानां ज्ञातार आसन्। तैः विविधौषधिनां विद्यानाञ्च ज्ञानं प्राप्तं मया। तदनन्तरं द्वितीयगुरुभ्यः श्रीराधास्वामीमहोदयेभ्यः अध्यात्मविषयस्य ज्ञानं लब्धमिति। मामुपरि महाराष्ट्रप्रान्ताधिपतिकुलेष्टदेवव्रजेश्वरस्य बहुकृपाऽस्ति। मयानेन सह दानवसहस्रबाहुश्रीहनुमन्तः, डोमदेवतायाः शिरगुल-देवस्य च तपश्चर्याः कृताः सन्ति। याभिः मामनन्तालौकिक-दिव्यशक्तयः लब्धाः। एतैः प्रभावैः बहवोऽसाध्यरोगाणां भूतप्रेतादिभिः प्राप्तायाः पीडायाः पितृदोषादीनाञ्च निवारणं सफलीपूर्वकं कृतमिति गुरुवर्य्याणां दृढनिश्चयः। अद्यतनीयकालं यावत् तैः हिमालयस्य विभिन्नक्षेत्रेषु लभ्यमानाः दिव्यौषधिभिः सिद्धमन्त्रैश्च विविधरोगैः सह यथा वातरोगमधुमेहविषव्रणीनाम् असाध्यरोगाणामपि निदानं मम गुरुचरणानामनुग्रहैरेव सफलतापूर्वकं क्रियते।

एतदतिरिक्तं श्रीतुलसीराममहोदयः, नाड़ीरोगविशेषज्ञा श्रीमती-शीलादेवी, आयुर्वेदाचार्यरामेश्वरठाकुरः, तारादेवी, पण्डितकृष्ण-लालशर्मा, आचार्यकेशवमहोदयो हिमाचलप्रदेशस्य विविधमहा-पुरुषाः सन्ति। एतादृशाः विद्वांसो न केवलं हिमाचलप्रदेशे अपि तु सम्पूर्णभारतवर्षे विरलतया दरीदृश्यते। अत एव एतादृश्यः विभूतयः भारतीयाधुनिकसंस्कृतसाहित्यस्य पोषकाः सन्ति।

**निष्कर्षः**

अखिलभारतवर्षे ये साधकाः विद्यन्ते, तेषां मूलभूताश्रयन्तु हिमालयपर्वत इति। यदि एतदतिरिच्य कुत्रापि साधकाः विद्यन्ते ते तु काञ्चीपुरस्थकामाख्यादेवीशक्तिपीठे, कालीकटप्रदेशे वैद्यनाथे चेत्यादिसुप्रसिद्धस्थानेषु अनेके साधकाः विद्यन्ते। तेषु केचन दृग्गोचराः केचन अदृश्याः सन्ति, अदृश्यसाधकाः कदाचित् महाकुम्भसमये प्रयागराजे दृग्गोचरीभवन्ति। ते साधनावशात्कदापि सांसारिकजनेषु आगत्य नैव निवसन्ति।

तपश्चर्यायै साधकाः सदैव अनेकमासपर्यन्तम् एकान्तस्थानेष्वेव निवसन्ति, यतो हि साधनायां कदाचित् किमपि कोलाहलादिकं नैव प्राप्नुयात्। साधकाः स्वेष्टदेवस्य साधनायै विविधोपचारैः, विभिन्ननियमैः तथा च अनेकप्रयत्नैः गुरोः आज्ञाफलेनैव स्वदेवं प्रसन्नं कर्तुं प्रयासः कुर्वन् सफलीभवति। सफलताप्राप्त्यनन्तरं केचन सांसारिकजनानां सहायता कुर्वन्ति, केचन सांसारिकजनानेभ्यः दूरे गत्वा पर्वतादिषु निवसन्तः घोरतपश्चर्याद्वारा मोक्षः प्राप्नुवन्ति।

प्रस्तुताध्याये केषाञ्चन् साधकजनानामेव अत्र नामग्रहणपुरस्सरं तेषामुपलब्धिनामपि विश्लेषणं विहितम्मया। एतादृशानां साधकानां सङ्ख्या तु साधारणजनानामपेक्षया न्यूना वर्तते, तथाऽपि परोक्षप्रत्यक्षरूपेण ये समाजस्य कल्याणं कर्तुं समर्थाः तथा दृग्गोचरीभवन्ति। एते समाजसुधारकाः तथा च समाजहितेषिणः सर्वथा पूजनीयाः आदरणीयाश्च भवन्तीति।

**सन्दर्भग्रन्थाः**


1. महाभारतम्, वेदव्यासः, गीताप्रेसगोरखपुरम्, पञ्चदशसंस्करणम्, २००९
2. श्रीमद्भागवतमहापुराणम्, गीताप्रेसगोरखपुरम्, विंशसंस्करणम्, २०२२
3. अग्निमहापुराणम्, गीताप्रेसगोरखपुरम्, एकादशसंस्करणम्, २०१२
4. स्वतंत्रता संग्राम का इतिहास, हिमाचल प्रदेश सरकार धर्मशाला द्वारा प्रकाशित पाठ्यपुस्तक प्रथमसंस्करण, 1998।
5. हिमाचल संस्कृत साहित्य का इतिहास, डॉ०ओमप्रकाशशर्मा, हिमाचल कला संस्कृति भाषा अकादमी, क्लिफ ऐण्ड एस्टेट, शिमला-171001 प्रथम संस्करण 2019
6. वैदिक छन्दोमीमांसा, युधिष्ठिरमीमांसकः, प्रकाशनस्थानम्-अमृतसरः संस्करणसंवत्सरः १९४९


**सहायकस्रोतांसि**

स्वयमेव महापुरुषैः तथा तेषां परिवारेण साकं प्रत्यक्षरूपेण सम्मेलनम्।